घटादिबुद्धिविषयोऽसत्- व्यभिचारात्, नतु सद्बुद्धिविषयः असत् अव्यभिचारात्।

ननु घटे नष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति, चेन्न--पटादावपि सद्बुद्धिदर्शनात्- विशेषणविषयैव सा सद्बुद्धिः, सद्बुद्धिवत् घटबुद्धिरपि घटान्तरे दृश्यत

---

चूर्णबुद्धिविषयः,स्वकाले घटबुद्धिविषयः- अतः कालत्रयेऽप्यनियतरूपत्वेन अनियतबुद्धिविषयत्वाद्व्यभिचारित्वं घटस्य- तद्बुद्धेश्चानियतविषयत्वेनानियतरूपत्वाद्व्यभिचारित्वमिति। यत्सदाऽप्येकरूपं तदव्यभिचारि, यत्त्वनियतरूपं तद्व्यभिचारीति सिद्धान्तात्। **नत्विति**। सद्बुद्धिस्तु न व्यभिचरतीत्यर्थः। फलितमाह—**तस्मादिति**। सद्बुद्धेरव्यभिचारित्वाद्घटादिबुद्धेश्च व्यभिचारित्वादित्यर्थः। **घटादिबुद्धिविषय इति**। घटादिवस्त्वित्यर्थः। असत् भवतीति शेषः। हेतुमाह—**व्यभिचारादिति**। व्यभिचारश्च दर्शितः विकारश्च व्यभिचरतीत्यादिनेति बोद्धव्यम्। **नत्विति**। सद्बुद्धेर्विषयः गोचरः वस्तु तु नासत्—अव्यभिचारात्कालत्रयेप्येकरूपेण वर्तमानत्वादित्यर्थः। किंतु सदेवेत्यर्थः। एतेन- असद्बुद्धिविषयस्य घटादिकार्यजातस्य मृदादिकारणजातस्य चासत्त्वेपि सद्बुद्धिविषयस्य परमकारणस्य ब्रह्मणस्सत्त्वान्न शून्यवादप्रसङ्ग इति सिद्धम्। अत्रेदमवधेयम्— कारणधर्मः कार्येऽन्वेति- यथा मृद्धर्मः काठिन्यनैल्यादिकं घटे- एवमात्मन आकाशस्सम्भूत इति सर्वजगत्कारणस्यात्मनस्सच्चिदानन्दरूपस्य धर्मास्सत्ताचैतन्यानन्दाः कार्ये जगत्यनुगताः। अत एव- घटोऽस्ति घटो भाति घटः प्रिय इत्यादिर्व्यवहारः। एतद्व्यवहारबलाद्घटादिकार्यजाते श्रूयमाणास्सत्ताभानानन्दाः खल्वात्मधर्माः कार्यत्वादात्माभिन्ने कार्यजाते वर्तमाना इव प्रतिभान्ति। नतु वस्तुतस्तत्र सन्ति- मृद्धर्माः काठिन्यादयोऽपि हि घटाकारपरिणतमृद्येव वर्तन्ते- नतु कम्बुग्रीवत्वाद्याकारे- तद्वद्घटादौ प्रतीयमानास्सत्ताचैतन्यानन्दाः घटाद्यवच्छिन्नचैतन्यात्मनिष्ठा एव। ततश्च घटस्सन्निति घटे श्रूयमाणा सत्ता आत्मसत्तैव- नतु घटसत्ता। तस्याश्च सत्ताया घटस्य पृथक्करणे असन्नेव घटोऽवशिष्यते। एवं सर्वमपि जगत्कारणचैतन्यसत्तयैव सदित्युच्यते- अन्यथा तु जगदसदेवेति। किंच मृद्घट इतिवत्सन् घट इत्यपि प्रयोगः कार्यकारणाभेदनिबन्धन एवेति कृत्वा तत्र सच्छब्दः घटभिन्नमात्मानमेव बोधयति- यथा मृद्घट इत्यत्र मृच्छब्दो घटभिन्नां मृदम्। अतत्त्वदर्शिनस्त्वत्र भ्रान्ता घटमेव सन्तं मन्यन्त इति।

अथ असद्बुद्धेरिव सद्बुद्धेरपि व्यभिचारमाशङ्कते—**नन्वित्यादिना**। घटे विद्यमाने सन् घट इति बुद्धिद्वयमासीत्- घटे नष्टे तु घटबुद्धिरिव सद्बुद्धिरपि नष्टैव। नहि घटनाशानन्तरं सन्निति बुद्धिर्भवेदित्यर्थः। परिहरति—**नेति**। पटादावपि सद्बुद्धिदर्शनान्न सद्बुद्धिर्व्यभिचरतीत्यन्वयः। यदि घटनाशादेव घटबुद्धिनाशवत्तत्समानाधिकरणसद्बुद्धिनाशस्स्यात्तर्हि पटस्सन्निति पटबुद्धिसामानाधिकरण्येन सद्बुद्धिर्न स्यादिति भावः। पटादावित्यस्य पटादिबुद्धिसामानाधिकरण्येनेत्यर्थो वाच्यः। यथाश्रुतार्थे तु सद्बुद्धिविषयत्वं पटादेरापतति- तद्व्यनिष्टम्। सद्बुद्धेर्घटनाशादनाशे हेत्वन्तरमाह—**विशेषणविषयैव सा सद्बुद्धिरिति**। विशेषणं विषयो यस्यास्सा विशेषणविषया सन् घट इत्यादौ हि सन्निति विशेषणं- घटादयस्तु विशेष्याणीति कृत्वा सद्बुद्धेर्विशेषणविषयत्वं- नीलोत्पलं नीलाम्बरं